# जीवनस्य रहस्यम्

**(अतीतकालः - लङ्प्रयोगः)**



कश्चन आम्रवृक्षः । तस्य वृक्षस्य शाखायाम् एकं सूत्रं लम्बमानम् **आसीत्** । तस्मिन् सूत्रे एकः कोकिलः बद्धः । बहुयत्नेन अपि तस्मात् सः मुक्तः न **अभवत्** ।

सूत्रेण बद्धं तं कोकिलं केचन काकाः **अपश्यन्** । ते कोकिलं विनाशयितुं तत्पराः **अभवन्** । क्रमेण काकाः तस्य समीपम् **आगच्छन्** । चञ्चूद्वारा कोकिलम् **अपीडयन्** । काकानां पीडया सः क्षताक्तः अभवत् । सूत्रबन्धनेन सः दुःखितः **आसीत्** । तन्मध्ये काकानां पीडा अधिकं दुःखम् **अददात्** ।

तस्मिन् एव काले एकः बृहत् काकः तत्र **आगच्छत्** । सः कोकिलस्य उपरि आक्रमणम् **अकरोत्** । अयं काकः कालरूपः आसीत् । स्वजीवनस्य रक्षणे असमर्थः कोकिलः ''अहं नूनं मृत्युं प्राप्स्यामि'' इति **अचिन्तयत्** ।

एतत् सर्वं तस्य वृक्षस्य अधः स्थितः एकः सज्जनः **अपश्यत्** । सः मनसि एवं चिन्तितवान् यत् ''कोकिलः नूनं मरिष्यति'' इति । ''भो भगवन् ! भवान् निष्करुणः भवति ? निष्पापं कोकिलं किमर्थं न रक्षति ?''

तस्मिन् एव काले काकस्य कोकिलस्य च भारम् असहमानं तत् सूत्रं छिन्नम् अभवत् । सूत्रबन्धनात् मुक्तः कोकिलः शीघ्रम् उड्डीय दूरम् **अगच्छत्** ।

तदा सः सज्जनः सानन्दम् **अवदत्** - साधु, भगवन् ! मृत्युरूपेण आगतः काकः कोकिलस्य मोक्षाय **अभवत्** । धन्या भवतः माया ।

| |
|---|
| **कश्चन, सूत्रम्, बद्धः, मुक्तः, तत्पराः, क्षताक्तः, सज्जनः, नूनम्, छिन्नम्, माया** |

## टिप्पणी

**शब्दार्थः -**

समीपम् - निकटम् (ନିକଟରେ), बृहत् काकः - डामरा काउ इति भाषायाम् - (ଡାମରା କାଉ), कालरूपः - मृत्युरूपः (ମୃତ୍ୟୁ ରୂପୀ), लम्बमानम् - लम्बितम् (ଲମ୍ବିଥିବା), अधः - तले / निम्नभागे (ତଳେ), मनसि -

मनोमध्ये (ମନରେ), निष्पापम् - पापरहितम् (ପାପଶୂନ୍ୟ), उड्डीय - उड्डयनं कृत्वा (ଉଡ଼ି), असहमानम् - सहने असमर्थम् (ସହିପାରୁନଥିବା), निष्करुण: - करुणारहित: (ନିର୍ଦ୍ଦୟ) ।

## अभ्यास :

- **पश्यत उच्चै: पठत -**

**लङ्लकार:- अतीतकाल:**

| **पठ्-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
|---|---|---|---|
| **एकवचनम्-** | स:/सा/बालक: अपठत् | त्वम् अपठ: | अहम् अपठम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अपठताम् | युवाम् अपठतम् | आवाम् अपठाव |
| **बहुवचनम्-** | ते/ता:/बालका: अपठन् | यूयम् अपठत | वयम् अपठाम |
| **भू-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: अभवत् | त्वम् अभव: | अहम् अभवम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अभवताम् | युवाम् अभवतम् | आवाम् अभवाव |
| **बहुवचनम्-** | ते/ता:/बालका: अभवन् | यूयम् अभवत | वयम् अभवाम |
| **अस्-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: आसीत् | त्वम् आसी: | अहम् आसम् |
| **द्विवचनम्-** | तौ/ते/बालकौ आस्ताम् | युवाम् आस्तम् | अवाम् आस्व |
| **बहुवचनम्-** | ते/ता:/बालका: आसन् | यूयम् आस्त | वयम् आस्म |
| **नी-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: अनयत् | त्वम् अनय: | अहम् अनयम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अनयताम् | युवाम् अनयतम् | अवाम् अनयाव |
| **बहुवचनम्-** | ते/ता:/बालका: अनयन् | यूयम् अनयत | वयम् अनयाम |
| **गम्-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: अगच्छत् | त्वम् अगच्छ: | अहम् अगच्छम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अगच्छताम् | युवाम् अगच्छतम् | अवाम् अगच्छाव |
| **बहुवचनम्-** | ते/ता:/बालका: अगच्छन् | यूयम् अगच्छत | वयम् अगच्छाम |

| | | | |
|---|---|---|---|
| **कृ-** | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
| **एकवचनम्-** | सः/सा/बालकः अकरोत् | त्वम् अकरोः | अहम् अकरवम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अकुरुताम् | युवाम् अकुरुतम् | आवाम् अकुर्व |
| **बहुवचनम्-** | ते/ताः/बालकाः अकुर्वन् | यूयम् अकुरुत | वयम् अकुर्म |
| **दृश्-** | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
| **एकवचनम्-** | सः/सा/बालकः अपश्यत् | त्वम् अपश्यः | अहम् अपश्यम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अपश्यताम् | युवाम् अपश्यतम् | आवाम् अपश्याव |
| **बहुवचनम्-** | ते/ताः/बालकाः अपश्यन् | यूयम् अपश्यत | वयम् अपश्याम |
| **दा-** | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
| **एकवचनम्-** | सः/सा/बालकः अददात् | त्वम् अददाः | अहम् अददाम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अदत्ताम् | युवाम् अदत्तम् | आवाम् अदद्व |
| **बहुवचनम्-** | ते/ताः/बालकाः अददुः | यूयम् अदत्त | वयम् अदद्म |
| **पा-** | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
| **एकवचनम्-** | सः/सा/बालकः अपिबत् | त्वम् अपिबः | अहम् अपिबम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अपिबताम् | युवाम् अपिबतम् | आवाम् अपिबाव |
| **बहुवचनम्-** | ते/ताः/बालकाः अपिबन् | यूयम् अपिबत | वयम् अपिबाम |
| **स्था-** | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
| **एकवचनम्-** | सः/सा/बालकः अतिष्ठत् | त्वम् अतिष्ठः | अहम् अतिष्ठम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अतिष्ठताम् | युवाम् अतिष्ठतम् | आवाम् अतिष्ठाव |
| **बहुवचनम्-** | ते/ताः/बालकाः अतिष्ठन् | यूयम् अतिष्ठत | वयम् अतिष्ठाम |
| **ज्ञा-** | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
| **एकवचनम्-** | सः/सा/बालकः अजानात् | त्वम् अजानाः | अहम् अजानाम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अजानीताम् | युवाम् अजानीतम् | आवाम् अजानीव |
| **बहुवचनम्-** | ते/ताः/बालकाः अजानन् | यूयम् अजानीत | वयम् अजानीम |

| **श्रु-** | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|
| **एकवचनम्-** | सः/सा/बालकः अशृणोत् | त्वम् अशृणोः | अहम् अशृणवम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अशृणुताम् | युवाम् अशृणुतम् | आवाम् अशृण्व |
| **बहुवचनम्-** | ते/ताः/बालकाः अशृण्वन् | यूयम् अशृणुत | वयम् अशृण्म |

**उदाहरणानुसारं शून्यस्थानं पूरयत -**

| | एकवचनम् | द्विवचने | बहुवचने |
|---|---|---|---|
| प्रथमपुरुषः – | सः छात्रः ~~आसीत्~~ | तौ छात्रौ .................. । | ते छात्राः ................. |
| मध्यमपुरुषः - | त्वं छात्रः आसीः । | युवां छात्रौ.................. । | यूयं छात्राः ............... |
| उत्तमपुरुषः - | अहं छात्रः आसम् । | आवां छात्रौ................. । | वयं छात्राः ............... |

१. **उदाहरणानुसारं पदं पूरयत -**

| | **वर्तमानकालः** | **अतीतकालः** |
|---|---|---|
| **(क)** | **एकः बालकः अस्ति ।** | **एकः बालकः आसीत् ।** |
| | सः नदीकूलं गच्छति । | सः नदीकूलम् ............. । |
| | तस्य मित्राणि सन्ति । | तस्य मित्राणि ............. । |
| | नदीकूले ते एकं मयूरं पश्यन्ति । | नदीकूले ते एकं मयूरम् ............. । |
| | सः मयूरः तृषातुरः अस्ति । | सः मयूरः तृषातुरः ............. । |
| | मयूरः शीघ्रं शीघ्रं जलं पिबति । | मयूरः शीघ्रं शीघ्रं जलम् ............. । |
| | मयूरः अन्यत्र गच्छति । | मयूरः अन्यत्र ............. । |
| **(ख)** | **एका बालिका अस्ति ।** | **एका बालिका आसीत् ।** |
| | सा संस्कृतं पठति । | सा संस्कृतम् ............. । |
| | सा अपि मधुरं गायति । | सा अपि मधुरम् ............. । |
| | सा सर्वदा प्रसन्ना भवति । | सा सर्वदा प्रसन्ना ............. । |
| | सा गीतं लिखति । | सा गीतम् ............. । |

| | |
|---|---|
| **(ग) त्वं भारतमातु: गीतं गायसि ।** | **त्वं भारतमातु: गीतम् अगाय: ।** |
| युवां सर्वदा सत्यं वदथ: ? | युवां सर्वदा सत्यम् ............. । |
| यूयं कुत्र भ्रमथ ? | यूयं कुत्र ............. ? |
| अहं कवितां लिखामि । | अहं कविताम् ............. । |
| आवां प्रश्नं पृच्छाव: । | आवां प्रश्नम् ............. । |
| वयं पुस्तकानि नयाम: । | वयं पुस्तकानि ............. । |

**२. ह्य: भवान्/भवती किम् अकरोत् इति पञ्चवाक्येषु लिखत -**

यथा- (क) अहं ह्य: देवालयम् अगच्छम् ।

(ख) ...................................

(ग) ...................................

(घ) ...................................

(ङ) ...................................

(च) ...................................

**३. शून्यस्थानं लङ्लकारद्वारा पूरयत -**

यथा - (क) अहं संस्कृतविश्वविद्यालयम् <u>अगच्छम्</u> । (गम्)

(ख) त्वं तत्र कदा ....................... (गम्)

(ग) वयं संस्कृतश्लोकम् ....................... (श्रु)

(घ) ते गीतानि ....................... (ज्ञा)

(ङ) यूयं कथां कदा ....................... (पठ्)

(च) आवां संस्कृतेन पत्रं ....................... (लिख्)

(छ) चिकित्सक: उत्तमौषधम् ....................... (दा)

(ज) अध्यापक: संस्कृतेन एव ....................... (वद्)

(झ) बस्याने यात्रिण: बहुवार्त्तालापम् ....................... (कृ)

(ञ) यूयम् अत्र ...................... (आ + गम्)

(ट) ते बालिके फलानि एव ...................... (खाद्)

४. **उदाहरणानुसारं धातूनां रूपाणि लिखत -**

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पठ् (प्र.पु) | अपठत् | अपठताम् | अपठन् |
| नम् (प्र.पु) | अनमत् | ............... | ............... |
| हस् (म.पु) | ............... | अहसतम् | ............... |
| क्रीड् (उ.पु.) | ............... | ............... | अक्रीडाम |
| भ्रम् (म.पु) | ............... | अभ्रमतम् | ............... |
| पत् (म.पु) | अपतः | ............... | ............... |
| दृश् (उ.पु.) | ............... | अपश्याव | ............... |
| लिख् (म.पु.) | ............... | ............... | अलिखत |
| चल् - (उ.पु.) | ............... | ............... | अचलाम |
| नृत् (म.पु.) | ............... | अनृत्यतम् | ............... |
| पा (प्र.पु) | ............... | ............... | अपिबन् |
| गै (म.पु.) | अगायः | ............... | ............... |
| श्रु (प्र.पु) | ............... | ............... | अशृण्वन् |
| प्रच्छ् (म.पु.) | ............... | अपृच्छतम् | ............... |

५. **एकपदेन उत्तरं कुरुत -**

(क) वृक्षशाखायां किं लम्बमानम् आसीत् ?

(ख) तस्मिन् सूत्रे कः बद्धः अभवत् ?

(ग) के कोकिलं विनाशयितुं तत्पराः अभवन् ?

(घ) ते कया कोकिलम् अपीडयन् ?

(ङ) कः कालरूपः आसीत् ?

(च) कोकिलः किम् अचिन्तयत् ?

(छ) वृक्षस्य अधः कः स्थितः ?

(ज) सूत्रं कथं छिन्नम् अभवत् ?

(झ) कस्मात् मुक्तः कोकिलः शीघ्रम् उड्डीय दूरम् अगच्छत् ?

(ञ) काकः कस्य मोक्षाय अभवत् ?

**६. शून्यस्थानं पूरयत -**

(क) तस्मिन् सूत्रे एकः कोकिलः बद्धः .................. ।

(ख) सूत्रेण बद्धं तं कोकिलं केचन काकाः .................. ।

(ग) काकाः तस्य समीपम् .................. ।

(घ) चञ्चूद्वारा कोकिलम् .................. ।

(ङ) सूत्रबन्धने सः दुःखितः .................. ।

(च) सः कोकिलस्य उपरि आक्रमणम् .................. ।

(छ) अहं मृत्युम् एव प्राप्स्यामि इति .................. ।

(अचिन्तयत्, अकरोत्, अभवत्, अपीडयन्, अपश्यन्, आगच्छन्, आसीत्)

**७. मातृभाषया अर्थं लिखत -**

(क) बहुयत्नेन अपि तस्मात् सः मुक्तः न अभवत् ।

(ख) ते कोकिलं विनाशयितुं तत्पराः अभवन् ।

(ग) काकानां पीडया सः क्षताक्तः अभवत् ।

(घ) तन्मध्ये काकानां पीडा अधिकं दुःखम् अददात् ।

(ङ) सः कोकिलस्य उपरि आक्रमणम् अकरोत् ।

(च) मृत्युरूपेण आगतः काकः कोकिलस्य मोक्षाय अभवत् ।

८. **उदाहरणानुसारं वाक्यानि रचयत । (लङ्लकारस्य प्रयोगः)**

बिलम् (गम्)

गीतम् (श्रु)

फुत्कारम् (कृ)



मण्डूकम् (खाद्)

निर्मोकम् (त्यज्)

मूषिकम् (दृश्)

जनम् (दन्श्)

*यथा - सर्पः बिलम् अगच्छत् ।*

(क) ..........................................................

(ख) ..........................................................

(ग) ..........................................................

(घ) ..........................................................

(ङ) ..........................................................

(च) ..........................................................

९. **स्तम्भद्वयं योजयत -**

| 'क' | 'ख' |
|---|---|
| लम्बमानम् | काकाः |
| कोकिलः | सज्जनः |
| केचन | सूत्रम् |
| विशालः | उपरि |
| एकः | बद्धः |
| कोकिलस्य | काकः |
| असहमानम् | भारम् |